दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-154 | 1 | मार्च 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लनवमी-दशमी
चैत्र 13 प्रविष्ठांशः मङ्गलमयः भवेत्

2 मुख्यमन्त्रिणा सुखविन्द्रसिंहसुक्खुना प्रदेशवासिभिः सह ६२तमः जन्मोत्सवः आचरितः

3 अग्निवीरेभ्यः २० प्रतिशतं वृत्ति-आरक्षणस्य अनुशंसा, गृहमन्त्रिणा राज्याणां मुख्यमन्त्रिभ्यः पत्रं लिखितम्

4 कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये द्विवसात्मक-अन्तारष्ट्रिय-सङ्गोष्ठ्याः प्रथमदिवसस्य सफलं समापनम्

## भारतस्य प्रधानमन्त्री नरेन्द्रमोदी पुनः एकवारं विश्वस्य सर्वाधिक लोकप्रिय नेतृत्वेन निर्वाचितः



विश्वस्य सर्वाधिक लोकप्रियः नेता प्रधानमन्त्री नरेन्द्रमोदी विश्वस्य सर्वाधिक लोकप्रियः नेता प्रधानमन्त्री नरेन्द्रमोदी अमरीका-देशस्य दत्तांश-विश्लेषण-संस्थया 'मॉर्निङ्ङ्ग कन्सल्ट' इत्यनया नूतने वैश्विक सर्वेक्षणे पुनः एकवारं विश्वस्य सर्वाधिक-लोकप्रिय-नेतृत्वेन निर्वाचितः। मार्च-मासस्य द्वि दिनाङ्कतः अष्ट दिनाङ्क-पर्यन्तं संचालिते अस्मिन् सर्वेक्षणे, श्रीमोदी अष्टषष्टिः प्रतिशतं अनुमोदन-मानाङ्क प्राप्तवान् । स्विट्जरलैण्ड-देशस्य राष्ट्रपतिः गाय पार्मेलिन तथा दक्षिण कोरिया-देशस्य राष्ट्रपतिः ली जे-म्युङ् च द्विषष्टिः प्रतिशतं अंकैः सह द्वितीयस्थाने स्तः। चेक गणराज्यस्य अर्जेण्टीना-देशस्य च नेतारौ क्रमशः सप्तपंचाशत् अथ पंचषष्टिः प्रतिशतं अङ्कान् प्राप्तवन्तौ । अस्यां सूच्यां अमरीका-राष्ट्रपतिः डॉनल्ड ट्रम्पः केवलम् एकत्रिंशत् प्रतिशतं अङ्कान् लब्ध्वा प्रथम-दश-शीर्ष-स्थानेषु स्थानं न अवाप्तवान्।

## पेट्रोल्-डीज़ल् इत्येतयोः पर्याप्तानि भण्डाराणि अपि रक्षितानि सन्ति - पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयः



सर्वकारेण उक्तं यत् देशस्य सर्वाणि तैलशोधागाराणि उच्चक्षमतया कार्यं कुर्वन्ति, यत्र पर्याप्तानि अशोधितानि तैलानि सन्ति। पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयः अवदत् यत् पेट्रोल्-डीज़ल् इत्येतयोः पर्याप्तानि भण्डाराणि अपि रक्षितानि सन्ति, यत्र सर्वाणि विक्रयणस्थानानि सम्पूर्ण देशे सामान्यरूपेण प्रवर्तन्ते, सर्वेषु पेट्रोल पम्प्स् इत्यत्र च पर्याप्तानि भण्डाराणि उपलभ्यन्ते। होर्मुज़-जलसंधेः पिधाने मन्त्रालयः अवदत् यत्, सम्पूर्ण देशे पेट्रोलियम-उत्पादानां, एल्. पी. जी. इत्यस्य च अविरामपूर्ति निर्वोढुं सर्वकारः अनेकान् उपायान् अकरोत्। अग्रे उक्तम् यत्, सम्पूर्णे देशे आन्तरिक एल्. पी. जी. सिलिण्डर इत्यस्य वितरणम् सामान्यम् एव अस्ति, एल्. पी. जी. वितरणक्षेत्रेषु शुष्कता न दृश्यते।

## भारतीय-रेलमार्गेण स्वस्य सञ्चार-आधारभूत संरचनायाः उन्नयनार्थं तथा 'कवच' इति स्वदेशी-स्वचालित-सुरक्षा-तन्त्रस्य विस्ताराय परियोजना स्वीकृता



भारतीय-रेलमार्गेण स्वस्य सञ्चार-आधारभूत संरचनायाः उन्नयनार्थं तथा 'कवच' इति स्वदेशी-स्वचालित-सुरक्षा-तन्त्रस्य विस्ताराय द्विशतोत्तरैकसहस्र कोटि-रूप्यतोप्यधिकमूल्यस्य परियोजना स्वीकृता। रेल-मन्त्रालयानुसारं एतासां योजनानां मुख्यं लक्ष्यं तावत् उन्नत-फाइबर-सञ्चार-प्रणाल्याः माध्यमेन रेल-जालस्य सञ्चालन-क्षमतायाः सुरक्षायाः च वर्धनमस्ति । मन्त्रालयेन मध्य रेलवे इत्यस्य पञ्चसु अपि मण्डलेषु सुदृढं ड्यूल-फाइबर-सञ्चार-जालं स्थापयितुं षड्शत् कोटि-रूप्यतोप्यधिक व्ययेन परियोजना अनुमोदिता। सुरक्षा-उपायेषु कवच चतुः दशांश शून्यं' इति उन्नत-तन्त्रं तमिळनाडु-केरळ-कर्णाटक-राज्येषु अष्टचत्वारिंशदुत्तरपंचशत् किलोमीटर् परिमितेषु अति-व्यस्त-मार्गेषु त्रिशत् कोटि-रूप्यकाणां व्ययेन स्थापयिष्यते। तन्त्रमिदं सङ्कटकाले स्वयमेव ब्रेक इति अवरोधं प्रयुज्य रेलयानानां परस्परं संघट्ट रोद्धं निर्मितमस्ति, येन व्यस्त-मार्गेषु यात्रा अधिका सुरक्षिता भविष्यति।

## मतदादातृणां कृते धनस्य निःशुल्कदानस्य च वितरणं निवारयितुं केन्द्रशासितप्रदेशस्य सर्वेषु निर्वाचनक्षेत्रेषु ड्रोनयन्त्रेण-निरीक्षणं नियोजयिष्यते - पुदुचेरी-मुख्यनिर्वाचनाधिकारी

पुदुचेरी-केन्द्रशासितप्रदेशस्य मुख्यनिर्वाचनाधिकारी पी.एस. जवाहरः अवदत् यत् मतदादातृणां कृते धनस्य निःशुल्कदानस्य च वितरणं निवारयितुं केन्द्रशासितप्रदेशस्य सर्वेषु निर्वाचनक्षेत्रेषु ड्रोनयन्त्रेण-निरीक्षणं नियोजयिष्यते। सः अवदत् यत् देशे एतत् प्रथमं अवसरम् अस्ति यत् राज्यस्य अथवा केन्द्रशासितप्रदेशस्य सर्वेषु निर्वाचनक्षेत्रेषु एतादृशं ड्रोन-निरीक्षणं कार्यान्वितम् अस्ति। पञ्चदश देशानाम् निर्वाचनप्रबन्धनसंस्थानां प्रतिनिधयः निर्वाचनप्रक्रियां निरीक्षणार्थं पुदुचेरी-नगरम् आगमिष्यन्ति इत्यपि सः सूचितवान्। सः अवदत् यत् उड्डयन-दलानां सङ्ख्या वर्धिता भविष्यति।

## सम्पूर्ण देशे दुर्घटनाप्रवण-ब्लैक् स्पाट्-इत्येतेषां अभिज्ञानम्, संशोधनम् च कृत्वा मार्ग-सुरक्षां वर्धयितुं विस्तृतानि उपायानि प्रारब्धानि सन्ति - नितिन गडकरी




केन्द्रीय-मार्ग-परिवहन राजमार्ग-मन्त्री नितिन गड्ङ्करी-वर्यः अवदत् यत्, सर्वकारेण सम्पूर्ण देशे दुर्घटनाप्रवण-ब्लैक् स्पाट्-इत्येतेषां अभिज्ञानम्, संशोधनम् च कृत्वा मार्ग-सुरक्षां वर्धयितुं विस्तृतानि उपायानि प्रारब्धानि सन्ति । नवदेहल्यां षविंशत्यधिक द्विसहस्रतम वर्षस्य सडक-सुरक्षा-अभियाने अभिनेत्रा आमिर खानेन सह वार्तालापं कुर्वन, मन्त्री अवदत् यत् उन्नतेः मार्गविन्यासस्य सुरक्षायाः च कृते चत्वारिंशत् सहस्रकोटिरूप्यकाणि व्ययः कृतः अस्ति, अपि च प्रायः अभिधीयमानेषु सार्द्ध-त्रिशत-कृष्ण-स्थानेषु प्रायः अशित्यधिक द्विशत-स्थानानां पूर्वमेव संशोधनम् अभवत्। श्री गड्ङ्करी वर्यः अवदत् यत् देशस्य वाहन-उद्योगः सद्यः एव वर्षेषु महती वृद्धिम् अवाप्नोत् तथा च तृतीयः बृहत्तमः वैश्विकरूपेण उद्भूतः अस्ति। सः अवदत् यत्, नीति-परिष्कारैः, मूलसौकर्याभिवृद्ध्या च समर्थितं, अग्रिमेषु पञ्चवर्षेषु भारतं अस्मिन् क्षेत्रे शीर्षस्थाने नयितुं दूरदृष्ट्या सह प्रशासनं कार्यं कुर्वन् अस्ति।

## सुभाषितम्

**इन्द्रियाणां निरोधेण,**
**रागद्वेषक्षयेण च।**
**अहिंसया च भूतानाम्,**
**अमृतत्वाय कल्पते।।**

अपनी इन्द्रियों पर नियन्त्रण, राग (किसी वस्तु को पाने की अत्यधिक इच्छा) और द्वेष (दूसरों के प्रति बुरी भावना) का न होना तथा सभी प्राणियों के प्रति अहिंसा की भावना, इन सभी का अनुपालन करने से मनुष्य को अमृतत्व (जीवन और मृत्यु के चक्र से मुक्ति अर्थात् स्वर्ग) की प्राप्ति हो जाती है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्



## बलोच-मानवाधिकार

जिनेवायां संयुक्तराष्ट्रसङ्घस्य मानव अधिकार-परिषदः एकषष्ठीतमे सत्रे, सत्रं सम्बोधयन्, बी. एन्. एम्. अध्यक्षेण नसीम बलोचः इत्यनेन पाकिस्तानस्य अधिकारिणाम् उपरि, सम्पूर्ण बलूचिस्ताने, न्यायेतर-हत्याः, बलात् अन्तर्धानम्, यातना इत्यादीनां गम्भीर-मानव-अधिकार-उल्लङ्घनानां आरोपः आरोपितम्।

# मुख्यमन्त्रिणा सुखविन्द्रसिंहसुक्खुना प्रदेशवासिभिः सह ६२तमः जन्मोत्सवः आचरितः





**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य मुख्यमन्त्रिणः सुखविन्द्रसिंहसुक्खुमहोदयस्य ६२तमः जन्मदिवसः अत्र महता हर्षोल्लासेन आचरितः। समाजस्य विभिन्नवर्गेभ्यः क्षेत्रेभ्यश्च आगताः जनाः, नेतारः, दलीयकार्यकर्तारः, अधिकारिणः कर्मचारिणश्च तस्य राजकीय-आवासं 'ओक ओवर' इति स्थानं गत्वा तस्मै जन्मदिवसस्य शुभाशयान् अयच्छन्। ते मुख्यमन्त्रिणः दीर्घायुषे उत्तमस्वास्थ्याय च प्रार्थनां कृतवन्तः। मुख्यमन्त्री चिनारपादपस्य रोपणं कृतवान्। अस्मिन् अवसरे तस्य धर्मपत्नी देहरा-क्षेत्रस्य विधायिका कमलेश ठाकुर महोदया तथा परिवारस्य अन्ये सदस्याः अपि उपस्थिताः आसन्। मुख्यमन्त्री गतप्रातः हिमाचलप्रदेशसचिवालयस्य कर्मचारीभिः आयोजितां 'मैराथन' धावनप्रतियोगितां हरितपताकां प्रदर्श्य प्रस्थानं कारितवान्। इयं धावनप्रतियोगिता सचिवालयात् आरभ्य मालरोडस्थिते चर्चसमीपे समाप्ता अभवत्। अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् सर्वकारेण प्रस्तुतं बजटं जनकल्याणाय केन्द्रितम् अस्ति।

## विकासस्य प्रतिबद्धता अधिकाररक्षणं च

प्रदेशस्य प्रदेशवासिनां च समृद्धये स्वां प्रतिबद्धतां पुनरावर्तयन् मुख्यमन्त्री अकथयत् यत् राज्यस्य सर्वाङ्गीणविकासं समृद्धिं च सुनिश्चितं कर्तुं आगामिवर्षेषु अधिकमुत्तमाः निर्णयाः स्वीकरिष्यन्ते। सः अवदत् यत् वर्तमानसर्वकारः 'सेवा परमो धर्मः' इति भावेन कार्यं करोति येन कल्याणकारीयोजनानां लाभः समाजस्य अन्तिमव्यक्तिं यावत् प्राप्नुयात्। सः १९५२ तः प्राप्यमाणस्य आर.डी.जी. (RDG) इत्यस्य स्थगनं प्रति चिन्तां प्रकटयन् अवदत् यत् आर.डी.जी. प्रदेशस्य जनतायाः अधिकारः अस्ति।

देशस्य विकासे हिमाचलस्य योगदानस्य उल्लेखं कुर्वन् सः अवदत् यत् हिमाचलप्रदेशः देशाय प्रतिवर्षं प्रायः १०,००० कोटिरूप्यकाणां पारिस्थितिकसेवाः (Ecological Services) प्रददाति। प्रदेशसर्वकारः विभिन्नमञ्चेषु राज्यस्य अधिकाराणां पक्षं दृढतया स्थापयति, एतेषु प्रयासेषु सर्वकारः निश्चितमेव सफलः भविष्यति। सः अवदत् यत् वित्तीय-अनुशासनस्य दिशि अनेके चरणाः स्वीकृताः सन्ति, येषां सकारात्मकं परिणामं शीघ्रमेव दृश्यते। सर्वकारेण सर्वेषां राजकीयकर्मचारिणां कृते पुरातनपेन्शनयोजना (OPS) पुनर्जीविता कृता अस्ति येन ते सम्मानपूर्वकं जीवनं यापयितुं शक्नुयुः।

समाजसेवा एवं आयोजनानिअस्मिन् शुभावसरे मुख्यमन्त्री 'हिमाचलप्रदेश- भवन- अन्यनिर्माणकर्मकरकल्याणमण्डल्याः' १८ महिलालाभार्थिभ्यः वित्तीयसहायतां दत्तवान्। प्रत्येकं लाभार्थिने ३ लक्षरूप्यकाणां सहायतायां प्रथमकिस्त-रूपेण १ लक्षरूप्यकाणि दत्तानि, येन तासां गृहनिर्माणस्य स्वप्नं साकारं भविष्यति।

मुख्यमन्त्रिणः जन्मदिवसस्य उपलक्ष्ये हिमाचलप्रदेश- युवाकाङ्ग्रेस- राज्ययुवाघटकैः इन्दिरागान्धी- क्रीडापरिसरे रक्तदानशिविरस्य मुष्टियुद्धप्रतियोगितायाः (Boxing) च आयोजनं कृतम्। अस्मिन् अवसरे मन्त्रिणः, विधायकाः, विभिन्नमण्डलानां निगमानां च अध्यक्षाः, वरिष्ठप्रशासनिकाः आरक्षक-अधिकारिणश्च मुख्यमन्त्रिणे शुभाशयान् अर्पितवन्तः।

## प्रधानमन्त्रिणः प्रेषिताः शुभकामनाः

प्रधानमंत्री नरेन्द्रमोदी गुरुवासरे हिमाचलप्रदेशस्य मुख्यमन्त्रिणं सुखविन्दरसुक्खुमहोदयं तस्य जन्मदिवसे अभिनन्दितवान्, तस्य दीर्घायुषे उत्तमस्वास्थ्याय च प्रार्थनां कृतवान् च। 'X' इत्यत्र एकेन सन्देशेन प्रधानमंत्री मोदी अलिखत् - "हिमाचलप्रदेशस्य मुख्यमन्त्रिणे श्रीसुखविन्दरसिंहसुक्खुमहोदयाय जन्मदिवसस्य शुभाशयाः। अहं तस्य दीर्घायुषे आरोग्यपूर्णजीवनाय च प्रार्थनां करोमि।"

# मुख्यमन्त्रिणा स्थगित-वेतन-प्रकरणे कर्मचारिभ्यः सहयोगः याचितः, अवदत् च आरडीजी (RDG) प्रदेशस्य जनतायाः अधिकारः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणः जन्मदिनस्य अवसरे सचिवालय- कर्मचारी- सङ्घेन (Union) गुरुवासरे एकस्याः जनजागरणयात्रायाः ('अवेयरनेस वॉक') आयोजनं कृतम्।अस्मिन् अवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुमहोदयः सचिवालय-कर्मचारिणां सहयोगार्थम् आभारं प्रकटितवान्। राजस्व- न्यूनता-अनुदानम् अर्थात् 'रेवेन्यू डेफिसिट ग्राण्ट' (RDG) इति अवरुद्धत्वात् स्थगित- वेतन- प्रकरणे अपि सः कर्मचारिभ्यः सहयोगस्य आह्वानम् अकरोत्। मुख्यमन्त्री अवदत्- "मया सह आह्वानानि चलन्ति, तानि अहं पारं करिष्यामि।" मुख्यमन्त्रिणा सचिवालयतः इयं जनजागरण-यात्रा हरितसंकेतं प्रदर्श्य प्रस्थापिता। इयं यात्रा सचिवालयात् आरभ्य 'रिज' मैदानस्थ- चर्च- समीपे समाप्ता अभवत्।अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् सर्वकारेण प्रस्तुतं आयव्ययकं (बजट) जन-कल्याणाय केन्द्रितं वर्तते। राज्यस्य सर्वाङ्गीण-विकासं समृद्धिं च सुनिश्चितं कर्तुं आगामि-वर्षेषु अधिकाः उत्तमाः निर्णयाः स्वीकरिष्यन्ते। सः अवदत् यत् वर्तमान- सर्वकारः 'सेवा परमो धर्मः' इति भावेन कार्यं कुर्वन् अस्ति, येन कल्याणकारी-योजनानां लाभः समाजस्य अन्तिम-व्यक्तिं यावत् प्राप्तुं शक्नुयात्।सः १९५२ वर्षात् प्राप्यमाणस्य आरडीजी (RDG) इत्यस्य स्थगनं प्रति चिन्तां प्रकटयन् अवदत् यत्- "आरडीजी प्रदेशस्य जनतायाः अधिकारः अस्ति।" देशस्य विकासे हिमाचलस्य योगदानस्य उल्लेखं कुर्वन् सः अवदत् यत् हिमाचलप्रदेशः देशाय प्रतिवर्षं प्रायः १०,००० कोटिरुप्यकाणां पारिस्थितिकसेवाः (Ecological Services) प्रददाति। प्रदेश-सर्वकारः विविध-मञ्चेषु प्रदेशस्य अधिकारान् दृढतया उत्थापयति, सर्वकारः च एतेषु प्रयासेषु अवश्यं सफलः भविष्यति। सः अवदत् यत् वित्तीय-अनुशासनस्य दिशि अनेकानि पदानि स्थापितानि, येषां सकारात्मक-परिणामाः शीघ्रमेव दृश्यमानाः भविष्यन्ति। सर्वकारेण सर्वेषां सर्वकारीय- कर्मचारिणां कृते पुरातन- पेंशन- योजना (OPS) पुनर्जीविता कृता, येन ते सम्मानजनकं जीवनं यापयितुं शक्नुवन्ति। अस्मिन् अवसरे मुख्यमन्त्रिणा 'हिमाचलप्रदेश- भवन- एवं- अन्य-सन्निर्माण-कामगार-कल्याण-बोर्ड' इत्यस्य १८ महिला-लाभार्थिभ्यः वित्तीय-साहाय्यम् अपि प्रदत्तम्। प्रत्येकं लाभार्थिने ३ लक्षरुप्यकाणां साहाय्यात् प्रथमांश- (Instalment) रूपेण १ लक्षरुप्यकाणि दत्तानि, येन तासां गृह-निर्माणस्य स्वप्नं साकारं भविष्यति।

# नेपालदेशे-जेन जी आन्दोलनकाले मुख्या गुप्तचरसंस्था राष्ट्रियान्वेषण-विभागः पूर्णतया विफलः अभवत्

सितम्बर-मासे सञ्जातस्य जेन-ज़ी आन्दोलनस्य कारणानि अन्वेष्टुं गठितस्य कार्की-अन्वेशनायोगस्य प्रतिवेदनेन स्पष्टं जातं यत् देशस्य मुख्या गुप्तचरसंस्था राष्ट्रियान्वेषणविभागः आन्दोलनकाले पूर्णतया विफलः अभवत्। सितम्बरमासस्य अष्ट दिनाङ्के काठमाण्डू-नगरे विभागस्य त्रुटिपूर्णानुमानेन केवलं त्रिसहस्वतः चतुः सहस्र पर्यन्तं प्रदर्शकाः एकत्रिताः भविष्यन्ति, अन्याः सुरक्षा-संस्थाः स्वकीयाः योजनाः निर्मितवत्यः। काठमाण्डू-नगरस्य मुख्य-जनपद-अधिकारिणा आरक्षक-अधिकारिभिः च आयोगस्य समक्षं दत्तैः वक्तव्यैः ज्ञायते यत् विभागस्य असत्य-सूचनायाः कारणेनैव सुरक्षा-सज्जासु शिथिलता अभवत्। प्रतिवेदने निष्कर्षः दत्तः यत् वास्तविक-संख्यायाः विभागस्य अनुमानस्य च मध्ये एतावान् महान् भेदः विभागस्य प्रमुखस्य हुतराज थापा इत्यस्य व्यावसायिक-दुर्बलतां प्रकटयति। यद्यपि थापा-महोदयः सूचना-सङ्ग्रहस्य आन्तरिक तन्त्रस्य सीमां तथा च साइबर-तन्त्रस्य अभावं दोषं मत्वा स्वकीयं उत्तरदायित्वं निवारयितुं प्रयत्नं कृतवान्।

# IPL 2026 आईपीएल इत्यस्य द्वितीय-चरणस्य समय-सारिणी निर्गता, धर्मशालायां भविष्यन्ति त्रयः क्रीडा-स्पर्धाः



**हिमसंस्कृतवार्ताः - नवदेहली।** आईपीएल (IPL) २०२६ इति क्रिकेट-महोत्सवस्य द्वितीय-चरणस्य समयसारिणी (Schedule) प्रसारिता अस्ति। अस्य क्रीडा-महोत्सवस्य अयं प्रमुखांशः १३ अप्रैलतः २४ मई २०२६ पर्यन्तं चलिष्यति, यस्मिन् 'लीग-स्तरस्य' अवशिष्टाः पञ्चाशत् (५०) स्पर्द्धाः भविष्यन्ति। यद्यपि प्रथम-चरणस्य कार्यक्रमः पूर्वमेव घोषितः आसीत्, यः २८ मार्चतः १२ अप्रैल २०२६ पर्यन्तं क्रीडिष्यते।
विश्वस्य बृहत्तमायाः टी-२० स्पर्धायाः अस्य १९-तमस्य संस्करणस्य आरम्भः तदा भविष्यति, यदा वर्तमान-विजेतृदलं 'रॉयल चैलेंजर्स बेंगलुरु' (RCB) बेंगलुरु-नगरस्य एम. चिन्नास्वामी-क्रीडाङ्गणे 'सनराइजर्स हैदराबाद' (SRH) इत्यस्य आतिथ्यं करिष्यति। प्रथम-चरणे १० स्थानेषु आहत्य २० स्पर्द्धाः भविष्यन्ति, येषु बेंगलुरु, मुम्बई, गुवाहाटी, न्यू-चण्डीगढ़, लखनऊ, कोलकाता, चेन्नई, देहली, अहमदाबाद तथा हैदराबाद इति नगराणि सम्मिलितानि सन्ति। अस्मिन् अन्तराले चतुर्वारं 'डबल-हेडर' (दिने द्वे स्पर्द्धे) भविष्यति।

## द्वितीय-चरणस्य विशेष-विवरणम्

द्वितीय-चरणस्य घोषणानुसारं एताः स्पर्द्धाः देशस्य १२ नगरेषु आयोजयिष्यन्ते। एतेषु बेंगलुरु, मुम्बई, चेन्नई, कोलकाता, देहली, अहमदाबादः, हैदराबादः, लखनऊ, जयपुरं, धर्मशाला, रायपुरं, तथा न्यू-चण्डीगढ़ इति नगराणि सन्ति। द्वितीय-चरणस्य आरम्भः १३ अप्रैल दिनाङ्के हैदराबाद-नगरे 'एसआरएच' (SRH) तथा 'आरआर' (RR) इत्यनयोः प्रतिद्वन्द्वितया सह भविष्यति।

## दलानां स्वकीय-क्रीडाङ्गणं (होम-वेन्यू) परिवर्तनानि च

केषाञ्चन दलानां गृह-क्रीडाङ्गणेषु अपि परिवर्तनानि दृश्यन्ते:
> पञ्जाब-किङ्ग्स् (PBKS) स्वकीय-स्पर्द्धाः न्यू-चण्डीगढ़-नगरे तथा धर्मशालायां क्रीडिष्यति, यत्र धर्मशालायां तिस्रः (३) स्पर्द्धाः भविष्यन्ति।
> राजस्थान-रॉयल्स् (RR) जयपुर-नगरे चतस्रः स्पर्द्धाः क्रीडिष्यति।
> आरसीबी (RCB) बेंगलुरु-नगरे तिस्रः तथा रायपुर-नगरे द्वे स्पर्द्धे क्रीडिष्यति।
क्रीडा-प्रेमिणां कृते अष्टवारं (८) 'डबल-हेडर' व्यवस्था कृता अस्ति, यत्र दिवा-स्पर्द्धाः ३:३० वादने तथा सायङ्काल-स्पर्द्धाः ७:३० वादने आरप्स्यन्ते।

# वहन-स्यूताय (Carry Bag) १५ रुप्यकाणां ग्रहणं महार्घम् अभवत्; उपभोक्ता-आयोगेन पञ्च-सहस्र-रुप्यकाणां दण्डः आरोपितः



**हिमसंस्कृतवार्ताः- शिमला।** जिला-उपभोक्ता-आयोगेन (शिमला) 'विशाल मेगा मार्ट' इत्ययं उपभोक्तृभ्यः वहन-स्यूताय (Carry Bag) अतिरिक्त-शुल्क-ग्रहणस्य दोषी दृष्टः। आयोगेन इदं 'अनुचित-व्यापार-पद्धतिः' इति मत्वा मार्ट-संस्थां वहन-स्यूतस्य गृहीतानि १५ रुप्यकाणि प्रतिप्रदातुं आदिष्टम्। अनेन सहैव मानसिक-पीडायै विधिक-व्ययाय च पञ्च-सहस्र (५,०००) रुप्यकाणां एकमुश्त-राशिं दातुं निर्देशः दत्तः। मार्ट-संस्थया न्यायालयस्य अयं आदेशः ४५ दिनेषु पालनीयः भविष्यति। आयोगस्य अध्यक्षः डॉ. बलदेवसिंहः सदस्या निधि-शर्मा च प्रकरणस्य श्रवणं कुर्वन्तौ अवदताम् यत्- "वस्तु-विक्रय-अधिनियम- १९३० इत्यस्य धारा ३६(५) अनुसारं वस्तुं 'वहनीय-स्थितौ' (Deliverable State) प्रदातुं विक्रेतुः उत्तरदायित्वं वर्तते।" आयोगेन कठोरा टिप्पणी कृता यत्- "यदा कोऽपि व्यक्तिः मार्ग-विक्रेतुः (रेहड़ी- फड़ी) अपि वस्तुं क्रीणाति, सोऽपि तत् कर्गदेन वा स्यूतेन वा आच्छाद्य ददाति।" इदमतीव आश्चर्यजनकं यत् एतादृशाः विशालाः 'मेगा-मार्ट' ग्राहकान् वस्तुनि हस्ते नेतुं विवशान् कुर्वन्ति अथवा तेभ्यः स्यूतस्य धनं गृह्णन्ति। उपालम्भकर्ता शङ्करशर्मा नरेन्द्रमेहता च ३१ अक्तूबर २०२५ दिनाङ्के छोटा-शिमलास्थित-मार्टतः वस्तुनि क्रीतवन्तौ आस्ताम्। वस्तूनि ५९७ रुप्यकाणां आसन्, परन्तु देयक-पत्रे १५ रुप्यकाणि अतिरिक्तं वहनस्यूतस्य योजितानि। यदा उपभोक्तृभ्या विरोधः कृतः, तदा प्रबन्धकेन (Manager) कथितम् यत्- "मार्ट-संस्था निःशुल्कं स्यूतं न प्रयच्छति।" तदनन्तरं उपभोक्ताभ्यां न्यायार्थम् आयोगस्य द्वारं गृहीतम्।

# लक्षशः जनानां प्राणरक्षिकां 'हिम-केयर' योजनां 'वञ्चना' (घोटाला) इति कथनं निर्लज्जता - जयरामठाकुरः



**हिमसंस्कृतवार्ताः - शिमला।** प्रतिपक्षनेता जयरामठाकुरः अवदत् यत् लक्षशः जनानां प्राणरक्षिकां, जनेषु चिकित्सां कारयितुं उत्साहं जनयन्तीं 'हिम-केयर' योजनां मुख्यमन्त्रिणा 'वञ्चना' (Scam/घोटाला) इति कथनं निर्लज्जता अस्ति। सर्वकाराय इयं वार्ता अद्यापि बाधते यत् जनानां जिह्वाग्रे भाजपा-पक्षस्य दर्जनाधिकाः योजनाः कण्ठस्थाः सन्ति, परन्तु अस्य सर्वकारस्य मन्त्रिणां पार्श्वे त्रिवर्षानन्तरमपि वक्तुं तिस्रः अपि योग्याः योजनाः न सन्ति। अतः जनानां जीवनरक्षिकाणां योजनानां स्थगनाय षड्यन्त्राणि क्रियन्ते। शिमलातः निर्गते विवरणे जयरामठाकुरः अवदत् यत्— "याभिः योजनाभिः जनानां जीवनं परिवर्तितं, ताः स्थगयित्वा अयं सर्वकारः राजनैतिक-प्रतिशोधस्य कार्यं कुर्यात् नाम, परन्तु प्रदेशस्य जनाः सर्वकारं कदापि न क्षमिष्यन्ते।"
सः अधिकं अवदत् यत्— "अस्माकं शासनकाले एव 'हिम-केयर' तथा 'आयुष्मान' योजनान्तर्गतं सार्ध-पञ्च-लक्षतः (५.५० लाख) अधिकानां जनानां चिकित्सा अभवत्, यस्मिन् ५०० कोटिरुप्यकेभ्यः अधिकः व्ययः जातः। मुख्यमन्त्री एकस्य 'कल्याणकारी-राज्यस्य' (Welfare State) अर्थं भावं च ज्ञातुं न शक्नोति। सः कदापि तादृशैः लाभार्थिभिः न मिलितवान्, ये स्वकीयाम् आर्थिकस्थितिं दृष्ट्वा चिकित्सां कारयितुं स्थाने रोगं गोपयितुं निर्णयं कृतवन्तः आसन्, परन्तु 'हिम-केयर' योजना तेभ्यः नवजीवनं दत्तवती। त्रिवर्षीये कार्यकाले यदा स्वकीयानां विफलतानां अतिरिक्तं किमपि दर्शयितुं नास्ति, तदा सर्वकारः षड्यन्त्रेषु निरतः जातः। 'मित्रेभ्यः एव कृपा' इति सिद्धान्तेन चलन् अयं सर्वकारः दानस्य स्थाने ग्रहणस्य, उद्घाटनानां स्थाने स्थगनस्य कार्ये लग्नः अस्ति।"जयरामठाकुरः अकथयत् यत् मुख्यमन्त्री किं वदति इति सः स्वयमेव न जानाति। मुख्यमन्त्रिणा २५ मार्च दिनाङ्के सदनस्य अन्तः उक्तं यत्— "वयं ९७२ कोटिरुप्यकाणि व्ययितवन्तः", तस्य पञ्चनिमेषानन्तरं पुनः उक्तं यत्— "७५० कोटिरुप्यकाणि व्ययितानि"। पुनः १९ मार्च दिनाङ्के सदनस्य अन्तः एव उक्तं यत्— "१०७२ कोटिरुप्यकाणि व्ययितानि, भाजपया केवलं ४५० कोटिः व्ययितानि"। एताः तिस्रः अपि परस्परविरोधिनीः वार्ताः मुख्यमन्त्रिणा अस्मिन्नेव सत्रे कथिताः, अधुना प्रश्नः अस्ति यत् तस्य का वार्ता सत्या अस्ति? चिकित्सालयेषु शल्यक्रिया-सामग्री (Surgical Items) नास्ति, अतः जनानां शल्यक्रियाः स्थगिताः। प्रश्नः अस्ति यत् यदि 'घोटाला' अभवत्, तर्हि मुख्यमन्त्री सार्ध-त्रिवर्षं यावत् किमर्थं भवितुं दत्तवान्? यदि कापि विसङ्गतिः आसीत्, तर्हि मुख्यमन्त्री त्रिवर्षं यावत् किमर्थं मौनम् अधारयत्? एतावत्सु दिनेषु वञ्चनां कुर्वत्सु कोऽपि दण्डः किमर्थं न दत्तः? यादृशीं राजनीतिं मुख्यमन्त्री कुर्वन् अस्ति, तया हिमाचलस्य कल्याणं न भविष्यति।

# संस्कृतसाहित्येषु मर्यादापुरुषोत्तमश्रीरामः(पर्वविशेषः)



**रमन्ते योगिनो यस्मिन्**
**सत्यानन्दे चिदात्मनि।**
**इति रामपदेनासौ**
**परं ब्रह्माभिधीयते॥**

भारतीयसंस्कृतौ रामनाम अत्यन्तं पवित्रं, पूज्यं च मन्यते। "रामः" इति शब्दः केवलं व्यक्तिवाचकः न, अपि तु धर्मस्य, सत्यस्य, मर्यादायाः च प्रतीकः अस्ति।संस्कृतसाहित्येषु श्रीरामस्य चरित्रं विविधरूपेण वर्णितम् अस्ति—कुत्रचित् देवतारूपेण, कुत्रचित् आदर्शमानवरूपेण, कुत्रचित् च आदर्शराजारूपेण।"मर्यादापुरुषोत्तमः" इति उपाधिः तस्मै दत्ता, यतः सः सर्वासु परिस्थितिषु मर्यादापालनं कृत्वा जीवनं यापितवान्। "मर्यादा" इति शब्दस्य अर्थः वर्तते सीमाः, नियमाः, आचारसंहिताः च। "पुरुषोत्तमः" इति तु श्रेष्ठः पुरुषः। अतः "मर्यादापुरुषोत्तमः" इति तस्य पुरुषस्य सूचकः, यः कदापि धर्ममर्यादां न त्यजति, अपि तु तस्य पालनं कृत्वा आदर्शं स्थापयति। श्रीरामः तादृशः एव पुरुषः आसीत्। संस्कृतसाहित्ये श्रीरामस्य प्रमुखं वर्णनं महर्षिणा वाल्मीकिना विरचिते "रामायणे" दृश्यते।

अत्र रामः धर्मस्य साक्षात् स्वरूपः इति प्रतिपादितः—"रामो विग्रहवान् धर्मः"अस्य अर्थः अस्ति—रामः धर्मस्य मूर्तिरूपः अस्ति।अत्र रामस्य विविधगुणाः वर्णिताः सन्ति सत्यनिष्ठा, करुणा, शौर्यं, विनयः, कर्तव्यपरायणता च। अयोध्याकाण्डे रामः पितुः दशरथस्य आज्ञां पालनं कृत्वा वनवासं अगच्छत्। अस्यां स्थितौ तस्य त्यागः अद्वितीयः विद्यते। सः राज्यं, सुखं, ऐश्वर्यं च त्यक्त्वा धर्मस्य पालनं कृतवान्।

रामस्य लक्ष्मणेन सह अतिशयः स्नेहः दृश्यते। भरतं प्रति अपि तस्य स्नेहः,विश्वासः च दृश्यते। भरतः अपि रामस्य पादुकां स्थाप्य राज्यं चालयति। रामः सीतां प्रति परमस्नेही, निष्ठावान् च आसीत्। वनवासे अपि सः सीतां रक्षितुम् प्रयत्नशीलः आसीत्।सीताहरणानन्तरं तस्य दुःखं, व्याकुलता च मानवीयभावान् दर्शयन्ति।युद्धकाण्डे रामः रावणं हत्वा धर्मस्य ध्वजं स्थापितवान्। अयं प्रसङ्गः दुष्टनिग्रहस्य, सज्जनपरित्राणस्य च प्रतीकः अस्ति।अपि च विष्णुपुराणे, भागवतपुराणे, अग्निपुराणे च श्रीरामः विष्णोः अवतारः इति वर्णितः अस्ति। तस्य अवतरणस्य कारणम्—धर्मसंस्थापनम्, अधर्मनाशः,भक्तरक्षणम् इत्यादि। भागवतपुराणे रामस्य चरित्रं भक्तिभावेन निरूपितम् अस्ति। सः केवलं राजा न, अपि तु भक्तानां हृदयस्य भगवान् अस्ति। महाकविना कालिदासेन "रघुवंशमहाकाव्ये" रामस्य वंशपरम्परा वर्णिता। रामः तत्र आदर्शराजा इति प्रतिपादितः।भवभूतिना विरचिते "उत्तररामचरिते" रामस्य जीवनस्य उत्तरार्धः वर्णितः। अत्र कविः रामस्य मानवीयतां, करुणां, धर्मनिष्ठां च अत्यन्तं मार्मिकतया प्रस्तुतवान्। पुनश्च सीतायाः परित्यागः, पितापुत्रयोः मेलनम्, रामस्य अन्तःकरणदुःखम् एते सर्वे प्रसङ्गाः हृदयस्पर्शिनः सन्ति। संस्कृतनाट्येषु अपि रामकथा विस्तृतरूपेण दृश्यते। नाटकेषु रामः धीरः, गम्भीरः, न्यायप्रियः च नायकः अस्ति।



नाट्यशास्त्रानुसारं सः "धीरोदात्तनायकः" इति वर्गे आगच्छति। अन्यत्र संस्कृतस्तोत्रेषु श्रीरामः भक्तानां आराध्यदेवरूपेण स्तूयते।

रामरक्षास्तोत्रे, रामाष्टके, आदित्यहृदयस्तोत्रे च रामस्य महिमा वर्णिता अस्ति।उक्तं च -

**"रामो राजमणिः सदा विजयते**
**रामं रमेशं भजे।**
**रामेणाभिहता निशाचरचमू**
**रामाय तस्मै नमः।**
**रामान्नास्ति परायणं परतरं**
**रामस्य दासोऽस्म्यहम्।**
**रामे चित्तलयः सदा भवतु मे**

भो राम! मामुद्धर ।अत्र रामः सर्वदुःखनाशकः, मोक्षप्रदाता च इति प्रतिपाद्यते।मर्यादापुरुषोत्तमत्वं निम्नलिखितैः गुणैः स्पष्टं भवति—

1. सत्यनिष्ठा-रामः सर्वदा सत्यं वदति, सत्यं आचरति च।
2. धर्मपालनम्-कठिनतमेषु परिस्थितिषु अपि सः धर्मं न जहाति।
3. त्यागः-राज्यस्य त्यागः, सुखस्य त्यागः—एतत् तस्य महान् त्यागः।
4. करुणा-रामः सर्वान् प्रति दयालुः आसीत्—शत्रुषु अपि।
5. न्यायप्रियता-राजारूपेण सः रामः न्यायं स्थापयति, सर्वान् प्रति समभावेन पश्यति।
6. आत्मसंयमः-रामः इन्द्रियनिग्रहं कृत्वा आदर्शजीवनं यापयति।

संस्कृतसाहित्ये "रामराज्यम्" आदर्शशासनस्य प्रतीकं मन्यते।
तत्र न कश्चित् दुःखी,न कश्चित् रोगी,
सर्वे सुखिनः,धर्मः प्रतिष्ठितः भवति।
एवं रामराज्यं आदर्शसमाजस्य सर्वोच्चरूपं भवति। अद्यतनीये समाजे अपि रामस्य आदर्शाः अत्यन्तं प्रासंगिकाः सन्ति।यदा मनुष्यः स्वधर्मं विस्मरति, तदा रामकथा तं पुनः मार्गे स्थापयति। नैतिकशिक्षायाः, सामाजिकसामञ्जस्यस्य, नेतृत्वस्य च क्षेत्रे रामः एव प्रेरणास्रोतः अस्ति।संस्कृतसाहित्येषु मर्यादापुरुषोत्तमश्रीरामस्य वर्णनं केवलं काव्यसौन्दर्यं न, अपि तु जीवनमार्गदर्शनम् अस्ति। रामः न केवलं देवता, अपि तु आदर्शमानवः, आदर्शनायकः च अस्ति। अतः सर्वेभ्यः सन्देशः—यदि वयं रामस्य गुणान् स्वजीवने अनुसरामः, तर्हि समाजः धर्ममयः, शान्तिमयः, समृद्धः च भविष्यति।अन्ते च -

**राम रामेति रामेति रमे रामे मनोरमे।**
**सहस्रनाम तत्तुल्यं रामनाम वरानने।।**

समेषां रामभक्तानां कृते श्रीरामनवम्याः हार्दिकी शुभासंशा। इत्यलम्।।

**डॉ विमलेश झा,डीएवी पब्लिक स्कूल,बरारी,भागलपुर बिहार**

# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये द्विवसात्मक-अन्तारष्ट्रिय-सङ्गोष्ठ्याः प्रथमदिवसस्य सफलं समापनम्

हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः। २६ मार्च, २०२६ दिनाङ्के कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य शिक्षाविभागस्य उद्योगेन, भारतीय-समाजविज्ञान-अनुसन्धान-परिषदः (ICSSR) मार्गदर्शनेन तथा विश्वविद्यालयस्य आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रस्य (IQAC) असम-कौशल-विकास-अभियानस्य च सहयोगेन एका अन्ताराष्ट्रिय-सङ्गोष्ठी आयोजिता। अस्याः सङ्गोष्ठ्याः उद्घाटन-समारोहः प्रातः १०:०० वादने दीपप्रज्वलनेन आरब्धः। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य रेक्टर-महोदया प्राध्यापिका मल्लिका कलिता वर्या स्वागतभाषणं दत्तवती। संगोष्ठ्याः उद्घाटनकर्तृत्वेन सर्वेभ्यः अभिनन्दनं प्रदत्तं विश्वविद्यालयस्य आदरणीयकुलगुरुणा आचार्यप्रह्लाद रा जोशीवर्येण। उद्घाटन-सत्रे श्रीहिरण्य नाथ महोदयेन आभासीयमाध्यमेन (Online) मुख्यभाषणं प्रदत्तम्।

उद्घाटन-समारोहे विषयविशेषज्ञरूपेण उपस्थितेन काठमाण्डू-विश्वविद्यालयस्य शिक्षा-महाविद्यालयस्य प्राध्यापकेन धनपति सुवेदी महोदयेन 'नेतृत्वकौशलं तथा सृजनशीलता' इति विषये, जर्मनीदेशस्य बोचम-प्रायोगिक-विज्ञान-विश्वविद्यालयस्य प्राध्यापकेन क्रिश्चियन काजनर महोदयेन 'युवापीढ्याः कौशलविकासे कृत्रिमबुद्धिमत्तायाः (AI) साहाय्यम्' इति विषये, तथा च संयुक्तराष्ट्र-औद्योगिक-विकास-सङ्गठनस्य (UNIDO) नवीकरणीय-ऊर्जा-विभागस्य (नवदेहली) श्रीदेवजित दास महोदयेन 'हीटिंग अप एण्ड राइजिंग एबाव' इति विषये स्वभाषणानि प्रस्तुतानि। अस्मिन् उद्घाटने जर्मनीदेशस्य प्राकृतिक-चिकित्सिका तथा शक्ति-औषधि-विशेषज्ञा उलराइक काजनर वर्या 'भावात्मक-बुद्धिमत्ता (Emotional Intelligence) तथा कौशलविकासः' इति विषये विशेषव्याख्यानं दत्तवती।अस्यां सङ्गोष्ठ्यां विश्वविद्यालयस्य कुलसचिवः प्राध्यापकः विकास भार्गव शर्मा महोदयः एकं विशेषसन्देशं प्रदत्तवान्। सङ्गोष्ठ्याः 'हाईब्रीडमोड' इत्यस्य षट्सु बौद्धिकसत्रेषु ४७ शोधार्थिनः अन्तर्जालमाध्यमेन तथा ४१ प्रतिभागिनः प्रत्यक्षतया (Offline) स्व-शोधपत्राणां वाचनं कृतवन्तः। सङ्गोष्ठ्याः द्वितीये दिवसे अपि सार्धं त्रयोदशसु (१३) बौद्धिकसत्रेषु द्विशताधिकाः (२००+) शोधार्थिनः शोधपत्राणि पठिष्यन्ति। कार्यक्रमस्य प्रथमदिवसस्य सफलसमापनं शिक्षाविभागस्य विभागाध्यक्षायाः डॉ. अलका दास वर्यायाः कृतज्ञता-ज्ञापनेन अभवत्।







# संस्कृतं मधुरं सदा- १७

भगवतः श्रीरामस्य महिमा अपारः। आदर्शपुरुषोत्तमः इति नाम्ना लोके सः प्रसिद्धः। भगवतः प्राकट्यं जगद्धिताय भवति। भगवतोऽपि भक्तस्य महिमा महत्तरः भवतीति सद्ग्रन्थेषु वर्णितं प्राप्यते। यदि परमभक्तः वाल्मीकिमुनिः नाभविष्यत्, तर्हि रामकथा अपि लोके नाभविष्यत्। रामकथायाः मूलकारणं तु केवलं परमतपस्वी श्रीवाल्मीकिमुनिः एव। मुनिना तपस्याबलतः, इष्टदेवस्य रामस्य कृपया च रामायणं विरचितम्, तदारभ्य रामायणी कथा लोके प्रसिद्धा जाता। यदि वाल्मीकिः पवित्रमिदं रामायणं नारचयिष्यत्, तर्हि मानवजातिः श्रीरामभगवन्तं नाज्ञास्यन्। अतः श्रीरामजन्मजयन्त्यवसरे अस्मिन्, तस्य परमभक्तस्य श्रीवाल्मीकिमुनेः यथाज्ञानं गुणानुवादमत्र कर्तुमुत्सहेऽहम्। अनेन भक्तगुणगानेन भगवान् श्रीरामप्रभुः स्वयं प्रसन्नतां गच्छेदिति कामये।

**'कूजन्तं रामरामेति मधुरं मधुराक्षरम्।**
**आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्।।'**

**'जान आदि कबि नाम प्रतापू।**
**भयउ सुद्ध करि उलटा जापू।।'**
**'उलटा नाम जपत जग जाना।**
**बालमीकि भए ब्रह्म समाना।।'**

'तव पार्श्वे यत्किमपि स्यात् तत्सर्वं मत्पुरतः स्थापय' इति अङ्गिरा-गोत्रोत्पन्नः ब्राह्मणपुत्रः रत्नाकरः अत्यन्तं निर्दयतापूर्वकम् अन्ययात्रिणः इव देवर्षिं नारदम् अतर्जयत्।

'भगवद्गुणगानस्य निमित्तं स्वीकृतं वीणा-करतालादिकं विहाय मत्पार्श्वे अन्यत् किंवा स्यात्, प्रिय वत्स?' इति अत्यन्तं स्नेहसिक्तया मधुरवाण्या स्मितवदनः देवर्षिः तस्मै उत्तरम् अददात्। निर्जनं वनम्, एकाकिकता, एवं पुरस्तात् क्रूरदस्योः कुटिलसङ्कल्पः च। परं भगवतः अनन्यभक्तस्य नारदस्य कृते धरातलस्य कस्मादपि प्राणिनः कुतो वा भयम्? तस्य कृते तु जीवमात्रस्योपरि अनुग्रहं विधाय भगवन्नामसुधाधारया तस्य मनः प्राणादिकस्य शीतलीकरणं हि अभीष्टं स्यात्। नारदः उक्तवान्- 'परन्तु भ्रातः! त्वं एतावत् निर्भयतापूर्वकं मनुष्यान् वृथा किमर्थं हंसि? जीवानां पीडनसदृशं नान्यत् किमपि पापम्। तत्पापकारणतः मृत्योरनन्तरं प्राणी नरकस्य भयङ्करीं यातनां भुञ्जीत।' इति।

'परिवारस्य पोषणाय' इति संक्षेपेण उत्तरितवान् स रत्नाकरः; किन्तु अन्ययात्रिणाम् अपेक्षया सर्वथा निर्भीकम्, हसन्तम् एनं यात्रिणं वीक्ष्य दस्योः मनः, किमर्थं वा, किञ्चित् असामञ्जस्ये पतितवत्, तस्य हिंसात्मिका क्रूरप्रवृत्तिरपि किञ्चित् शिथिलतां अशक्तताञ्च गतासीत्। 'प्राणिमात्रस्य भरणपोषणादिकं तु जगन्नियन्ता जगदीश्वरः करोति।' इति श्रीनारदः अत्यन्तं गाढात्मीयतापूर्वकं कृपापूर्वकञ्च ब्राह्मणदस्योरुपरि दयावृष्टिं कुर्वन् किञ्चिद्धसन् इव च निगदितवान्। 'मनुष्यः तु मिथ्याहङ्कारं करोति। जलचराः स्थलचराः, नभचराश्चेति अगणित-प्राणिनाम्, अनन्तजीवानाञ्च भरणपोषणादिकं कः करोति? यदा त्वं मातृगर्भे आसीः, तदा कः त्वाम् अरक्षत्? यदा त्वं जन्म लब्ध्वा भूमिम् आगतः तदा तव जनन्याः स्तनयोः तवैव भरणपोषणार्थं केन मधुरदुग्धस्य धारा प्रवाहिता? भरणपोषणाय तु त्वम् अन्यत्कार्यमपि कर्तुं शक्ष्यसि नु? परं सर्वासु विपत्तिषु गरिष्ठा विपत्तिः यत् एतस्य अधमकृत्यस्य भयानकपापफलं तव मातापितरौ, अन्यकुटुम्बिनश्च न कदापि भुञ्जीरन्, अपितु त्वं स्वयं हि भुञ्जीथाः, केवलं त्वं हि, नान्यः इति सम्यक् स्मर।' इति।'एतत् कथं सम्भवेत्?' इति साश्चर्यं रत्नाकरः पृष्टवान्। 'मम श्रमस्य उपभोक्तारः, मम कुटुम्बिनः स्वजनाश्च मम अपकर्मणः फलं किमर्थं न भुञ्जीरन्?' इति।'त्वं तान् हि पृच्छ!' इति देवर्षिः शान्तमनसा उक्तवान्। 'गच्छ, अहमत्रैव प्रतीक्षारतः भवेयम्।' इति। 'अस्तु' इति दस्युः संदिग्धस्वरेण उक्तवान्।'परन्तु, तव न क्वापि पलायनं स्यात्, अतः त्वाम् अस्मिन् वृक्षे बध्नामि।' इति। श्रीनारदस्य आपत्तिः कुतो वा? सः तु रत्नाकरस्य परमकल्याणाय हि चिन्तितः आसीत्। तेन सहर्षं दृढरज्जुबन्धनं स्वीकृतम्।

दस्युः गृहं गत्वा तद्विषये सर्वान् पृष्टवान्, परन्तु सर्वे तन्निराकृतवन्तः सर्वथा। ततः म्लानमुखः सन्, प्रत्यागत्य देवर्षिसमीपं प्राप्नोत्। सः तदा नितराम् अधीरः, भयग्रस्तश्च अदृश्यत। क्षोभविरक्त्यादिभिः तस्य मनः पूरितमभवत्। नारदं बन्धनात् विमोच्य तस्य चरणयोः स निपतितवान्। 'भवतः कथनं सर्वांशतः सत्यमेव!' इति। साश्रुनयनः सः उक्तवान्। 'मां दयापूर्वकं क्षमस्व। कृपापूर्वकञ्च कल्याणप्राप्तये मार्गदर्शनं कुरु। अहं भवत्तः अनृणः भवितुं नार्हिष्यामि कदापि। इतः परम् एतस्य अधमस्य कुकृत्यस्य पुनरावृत्तिः स्वप्नेऽपि न सम्भविष्यति।' इति।'रामनाम्नः जपं कुरु।' इति नारदः सम्यग्विचार्य उक्तवान्। 'परमभाग्यवतः पुरुषस्य मुखाद्धि तन्नाम निस्सरति।' इति। 'चेष्टायां कृत्यां सत्यामपि तन्नाम मुखात् न निस्सरति, किं कुर्याम्?' इति अतिदीनतया रत्नाकरः उक्तवान् देवर्षिं प्रति।'तर्हि त्वं मरा-मरा-मरा इत्येवं जप!' इति आदेशं दत्वा देवर्षिः ततः निर्गतः। ततः तत्क्षणतः हि स मरा-मरा-मरा इत्येवं जपितुम् आरभत दृढतया। एवम् अहर्निशं जापं जापं तस्य बहूनि वर्षाणि व्यतीतानि। वल्मीकेन सः आच्छादितः अभवत्। अनया घोरतपस्यया विधाता सन्तुष्टः। वल्मीकतः जातः इत्यतः ब्रह्मा तं 'वाल्मीकिः' इति नाम्ना सम्बोधितवान्, कमण्डलुस्थितेन अमृतजलेन तं सिञ्चन्। अमृतजलप्रभावेण तस्य अङ्गानि सहसा सुन्दराणि पुष्टानि च अभवन्। अयमेव रामनाम्नः अद्भुतचमत्कारः। क्व भयङ्करदस्युः क्व च परमरामभक्तः। श्रीवाल्मीकिना रामनामकृपया अमरः श्रीरामायणग्रन्थः विरचितवान्, यश्च ग्रन्थः अनुपमेयः विश्वप्रसिद्धश्च। तस्मै श्रीवाल्मीकि- परमगुरवे सहृदयं सहस्रशः नमो नमः! जय श्रीराम! शुभमिति।



हिमसंस्कृतवार्ता
✍ असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अद्य प्रथमा वार्ता एका नूतना घटना अस्ति। नवोद्यमस्य एकेन संस्थापकेन स्वस्य कर्मकरः अन्य-संस्थायां गुप्तकार्यं कुर्वन् दृष्टः।

**काव्या-** अहो! एतत् तु अतीव अनुचितम्। कर्मकरेण स्वामि-भक्तिः न दर्शिता। अन्या वार्ता अपि चिन्ताजनका अस्ति। एकेन बालकेन स्वभगिन्याः विषये उक्तम्। वैद्यकीय-प्रवेश- परीक्षायाः कृते पठन्ती सा भगिनी दिने दश-होराः यावत् कृत्रिम-मेधा-यन्त्रेण सह वार्तालापम् एव कृतवती अस्ति। सा यन्त्रम् एव मित्रं मन्यते।

**नन्दिनी-** कष्टम्! छात्राणां मानसिक-स्थितिः खलु दयनीया जाता। बेङ्गलुरु-नगरे अपि एका भयानका घटना दृष्टा। एकेन त्रिचक्रिका-चालकेन मार्गे यानं चालयता चलदूरवाण्यां चलच्चित्राणि दृष्टानि। तेन ध्यानेन न चालितम् अतः एकेन भारवाहकेण सह तस्य घट्टनम् अल्पेनान्तरेण निवारितम्।

**काव्या-** हा धिक्! चालकेन यात्रिणां प्राणैः सह क्रीडितम्। एषः महान् अपराधः। अन्तिमा वार्ता अतीव दुःखदायिनी अस्ति। एका औषधालय- सहायिका उद्योगार्थम् अन्यनगरं प्रति स्थानान्तरिता। सा नूतन-कार्ये नियोजिता, परन्तु केवलम् एकदिनानन्तरम् एव सा संस्थापकेन निष्कासिता।

**नन्दिनी-** अतीव खेदजनकम्। कर्मकरीं प्रति न्यायः न कृतः। अस्तु, अद्यतन-वार्ताः अत्र एव समाप्ताः। धन्यवादः।

# "लौकिकन्यायकोशः"

## "व्यालनकुलन्यायः"

व्यालः नाम सर्पः। सर्पस्य नकुलस्य च मध्ये शाश्वतं सहजं च वैरं भवति। एवं शाश्वतस्य वैरस्य उल्लेखार्थम् अस्य न्यायस्य प्रयोगः क्रियते।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्



केन्द्रीय संस्कृत विश्वविद्यालय
श्री रघुनाथ कीर्ति परिसर, देवप्रयाग, उत्तराखण्ड

विज्ञापन सं—CSU-SRKC/2025-26/02 दिनांक 18-03-2026

विभिन्न पूर्णरूप से अस्थाई पदों हेतु वॉक-इन साक्षात्कार

विभिन्न पूर्णरूप से अस्थाई पदों हेतु वॉक-इन साक्षात्कार के लिए आवेदन आमंत्रित किये जाते हैं। योग्यता, सामान्य- निर्देश, पात्रता- मानदण्ड हेतु कृपया केन्द्रीय संस्कृत विश्वविद्यालय, श्री रघुनाथ कीर्ति परिसर, देवप्रयाग की वेबसाईट http://www/csu-devprayag.edu.in का अवलोकन करें। अपने मूल प्रमाण-पत्रों एवं उनकी स्व-प्रमाणित प्रति के साथ साक्षात्कार स्थल पर निर्धारित समय से आधा घंटा पूर्व उपस्थित होना सुनिश्चित करें। पद की अवधि 2025-26 शैक्षिक सत्रान्त तक है।

| क्र. सं. | पदनाम | रिक्तियाँ | मासिक मानदेय |
|---|---|---|---|
| 1 | योग विज्ञान (Yogic Science) | 02 | 50,000 रुपये |
| 2 | वेद भाष्य (Ved Bhasya) | 01 | 50,000 रुपये |
| 3 | न्याय (Nyaya) | 01 | 50,000 रुपये |
| 4 | शारीरिक शिक्षा (Physical Education) | 01 | 50,000 रुपये |
| 5 | गुरूकुल शिक्षक (Gurukul Teacher) | 02 | 20,000 रुपये |

साक्षात्कार स्थल- केन्द्रीय संस्कृत विश्वविद्यालय, श्री रघुनाथ कीर्ति परिसर, देवप्रयाग
साक्षात्कार दिनांक - 29-03-2026, प्रातः 11.00 बजे

निदेशक